# Shri Shaktimahimna or Shri Tripuramba Mahimna Stotram

# દુર્વાસસાવિરચિતં શ્રીશક્તિમહિમ્ન અથવા ત્રિપુરામ્બિકામહિમ્નસ્તોત્રમ્

## Document Information

Text title : shaktimahimnastotra evam tripurAmahimnastotra from Shivarahasya

File name : shaktitripurAmahimnastotra.itx

Category : devii, otherforms, stotra, devI, dashamahAvidyA, shivarahasya

Location : doc_devii

Author : Durvasa

Transliterated by : DPD

Proofread by : DPD, Ruma Dewan

Description-comments : shrIshivarahasyam | bhavAkhyaH dvitIyAMshaH | adhyAyaH 29||

Latest update : April 5, 2013, September 15, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 15, 2023

*sanskritdocuments.org*

# દુર્વાસસાવિરચિતં શ્રીશક્તિમહિમ્ન અથવા ત્રિપુરામ્બિકામહિમ્નસ્તોત્રમ્

શ્રીમાતસ્ત્રિપુરે પરાત્પરતરે દેવિ ત્રિલોકીમહા-
સૌન્દર્યાર્ણવમન્થનોદ્ભવ સુધાપ્રાચુર્યવર્ણોજ્વલમ્ ।
ઉદ્યદ્ભાનુસહસ્રનૂતનજપાપુષ્પમભં તે વપુઃ
સ્વાન્તે મે સ્ફુરતુ ત્રિલોકનિલયં જ્યોતિર્મયં વાઙ્મયમ્ ॥ ૧૮॥

આદિક્ષાન્તસમસ્તવર્ણસુમણિપ્રોતે વિતાનપ્રભે
બ્રહ્માદિપ્રતિમાભિકીલિતષડાધારાબ્જકક્ષો(ક્ષ્યો)ન્નતે ।
બ્રહ્માણ્ડાબ્જવરાસને જનનિ તે મૂર્તિં ભજે ચિન્મયીં
સૌષુમ્નાયતપીતપઙ્કજમહામધ્યત્રિકોણસ્થિતામ્ ॥ ૧૯॥

વન્દેવાગ્ભવમૈન્દવાત્મસદૃશં વેદાદિવિદ્યાગિરો
ભાષા દેશસમુદ્ભવા પશુગતા (પશુગતાઃ) છન્દાંસિ સપ્તસ્વરાન્ ।
તાલાન્ પઞ્ચ મહાધ્વનીન્ પ્રકટયત્યાત્મપ્રસારેણ યત્
તદ્બીજં પદવાક્યમાનજનકં શ્રીમાતૃકે તે પરમ્ ॥ ૨૦॥

ત્રૈલોક્યસ્ફુટમન્ત્રતન્ત્ર મહિમાં નાપ્નોતિ શશ્વદ્વિના
(ત્રૈલોક્યસ્ફુટમેત્રમન્ત્રમહિમ સ્વાત્મોક્તિરૂપં વિના)
તદ્બીજં (યદ્બીજં) વ્યવહારજાલમખિલં નાસ્ત્યેવ માતસ્તવ ।
તજ્જાપ્યસ્મરણપ્રસક્તસુમતિસ્સર્વજ્ઞતાં પ્રાપ્ય કઃ
શબ્દબ્રહ્મનિવાસભૂતવદનો નેન્દ્રાદિભિસ્સ્પર્ધતે ॥ ૨૧॥

માત્રા યત્ર વિરાજતેતિ વિશદા તામષ્ટધામાતૃકાં
શક્તિં કુણ્ડલિનીં ચતુર્વિધતનું યસ્તત્વવિન્મન્વતે(મન્યતે) ।
સોડવિદ્યાખિલજન્મકર્મદુરિતારણ્ય પ્રબોધાગ્નિના
(સા વિદ્યાડખિલજન્મકર્મદુરિતાનીત્થં પ્રબોધાગ્નિના)
ભસ્મીકૃત્ય વિકલ્પજાલમખિલં માતઃ પદં તદ્વ્રજેત્ ॥ ૨૨॥

(ભસ્મીકૃત્ય વિકલ્પજાલરહિતો માતઃ પદં તે ભજેત્) ॥ ૨૨॥

યત્તે મધ્યમબીજમમ્બ કલયામ્યાદિત્યવર્ણં ક્રિયા-
 જ્ઞાનેચ્છાદિમનન્તશક્તિવિભવવ્યક્તિં વ્યનક્તિ સ્ફુટમ્ ।
ઉત્પત્તિસ્થિતિકલ્પકલ્પિતતનું સ્વાત્મપ્રસારેણ યત્
 કામ્યં બ્રહ્મહરીશ્વરાદિવિબુધૈઃ કામક્રિયાયોજિતૈઃ ॥ ૨૩॥

(યત્તે મધ્યમબીજમમ્બ કલયેમાદિત્યવર્ણ ક્રિયા-
 જ્ઞાનેચ્છાસુખદુઃખકલ્પિત તનુ સ્વાત્મપ્રસારેણ યત્ ।
કામ્યં બ્રહ્મહરીશ્વરાદિ વિબુધૈઃ કામક્રિયાયોજિતૈઃ
 કામં કારણતાં ગતા નગણિતાઙ્કાર્યૈરનેકૈર્મહિ) ॥ ૨૩॥

કામં કારણતાં ગતાનગણિતાન્કાર્યૈરનેકૈર્મહી-
 મુખ્યૈસ્સર્વમનોગતાનધિગતાન્માનૈરનેકૈસ્સ્ફુટમ્ ।
કામક્રોધસુલોભમોહમદમાત્સર્યાદિષટ્કઞ્ચ યદ્બીજં
 ભ્રાજયતિ (રાજયતિ) પ્રણૌમિ તદહં તે સાધુ કામેશ્વરિ ॥ ૨૪॥

યદ્ભક્તાખિલકામપૂરણચણસ્વાત્મપ્રભાવં મહા-
 જાડ્યધ્વાન્તનિવારણૈકતરણિ જ્યોતિર્વિબોધપ્રદમ્ ।
યદ્વેદેષુ ચ ગીયતે શ્રુતિમુખં માત્રાત્રયેણોમિતિ
 શ્રીવિદ્યે તવ સર્વરાજવશકૃત્તત્કામરાજં ભજે ॥ ૨૫॥

 (શ્રીવિદ્યે તવ સર્વરાજવશકૃચ્છ્રીકામરાજં ભજે) ॥ ૨૫॥

યત્તે દેવિ તૃતીયબીજમનલજ્વાલાવલીસન્નિભં
 સર્વાધાર તુરીયબીજપરમં (તુરીયશક્તિપરં) બ્રહ્માભિધાશબ્દિતમ્ ।
મૂર્ધન્યાન્તવિસર્ગભૂષિતમહોઙ્કારાત્મકં તત્પરં
 સંવિદ્રૂપમનન્યતુલ્યમહિમં સ્વાન્તે મમ દ્યોતતામ્ ॥ ૨૬॥

અગુપ્તા ગુપ્તાયાસ્સ્વયમપિ મહાન્તોઽપિ લઘવ-
 સ્સકીલા નિષ્કીલા ગુરુભિરુપદિષ્ટા અપિ તવ ।
પ્રસન્નાયાં દેવિ ત્વયિ સકલમન્ત્રાર્થફલદા
 તરોર્મૂલે સિક્તે વિલતિ ખલુ શાખાશતતમી ॥ ૨૭॥

સર્વં સર્વત એવ સર્વવિષયે કાર્યેન્દ્રિયાણ્યન્તરા
 તત્તદ્દિવ્યહૃષીકકર્મભિરિદં સવ્યસ્તુવાનાપરા ।
વાગર્થવ્યવહારકારણતનુશ્શક્તિર્જગદ્વ્યાપિની
 યદ્બીજાત્મકતાં ગતા તવ શિવે તં નૌમિ બીજં પરમ્ ॥ ૨૮/૨૭॥

અગ્નીન્દુદ્યુમણિપ્રભઞ્જનધરાનીરાન્તરસ્થાયિની
    શક્તિર્બ્રહ્મહરીશ(હરીન્દ્ર)વાસવમુખામર્ત્યાસુરાત્મ(સુરાન્ત)સ્થિતા ।
સૃષ્ટ(દૃષ્ટ્વા , દૃષ્ટા)સ્થાવરજઙ્ગમસ્થિતમહાચૈતન્યરૂપા ચ યા
    યદ્બીજસ્મરણેન સૈવ ભવતી પ્રાદુર્ભવત્યમ્બિકે(કા) ॥ ૨૯/૨૮ ॥

સ્વાત્મશ્રીવિજિતાજવિષ્ણુમઘવચ્છ્રીપૂરણૈકવ્રતં
    તદ્વિદ્યાકવિતાવિતાનલહરીકલ્લોલિનીદીપકમ્(દીપિતમ્) ।
બીજં યત્ત્રિગુણપ્રવૃત્તિજનકં બ્રહ્મેતિ યદ્યોગિનઃ
    શાન્તા નિત્યમુપાસતે તદિહ તે ચિત્તે દધે શ્રીપરે(શ્રીપુરે) ॥ ૩૦/૨૯ ॥

બ્રહ્માયોનિરમાસુરેશ્વરસુહૃલ્લેખાભિયુક્તૈસ્તથા
    માર્તાણ્ડેન્દુમનોભવાભવસુધીમાયાભીરુદ્રાશ્રિતૈઃ ।
સોમામ્બુક્ષિતિશક્તિભિઃ પ્રકટિતૈર્વર્ણાઙ્ગવેદક્રમૈઃ
    વર્ણૈશ્શ્રીશિવદેશિકેન વિદિતાં વિદ્યાં તવામ્બ શ્રયે ॥ ૩૧/- ॥

એકૈકં તબ માતૃકે પરતરે સંયોગિ વા (સંયોગિનો) યોગિ વા
    વિદ્યાદિપ્રકટપ્રભાવજનકં જાડ્યાન્ધકારાપહમ્ ।
યન્નિષ્ઠાશ્રમહોત્પલાસનમહાવિષ્ણુપ્રહર્તાદયો
    દેવાસ્સ્વેષુ વિધિષ્વનન્યમહિમસ્ફૂર્તિં દેધે તેઽપિ (દધત્યેવ) તત્ ॥ ૩૨/૩૦ ॥

ઇત્થં ત્રીણ્યપિ મૂલવાગ્ભવમહાશ્રીકામરાજસ્ફુરત્(સ્મતરત્)
    શક્ત્યાખ્યાનિ ચતુશ્શ્રુતિપ્રકટિતાન્યુત્કૃષ્ટકૂટાનિ તે ।
ભૂતર્તુ(ર્તુઃ)શ્રુતિસઙ્ખ્યવર્ણવિદિતાન્યારક્તકાન્તે શિવે
    યો જાનાતિ સ એવ સર્વજગતાં સૃષ્ટસ્થિતિધ્વંસકૃત્ ॥ ૩૩/૩૧ ॥

નિત્યં યસ્તવ માતૃકાક્ષરસખીં સૌભાગ્યવિદ્યાં જપે-
    ત્સમ્પૂજ્યાક્ષર(ત્સમ્પૂજ્યાખિલ)ચક્રરાજનિલયાં સાયન્તનાગ્નિમભામ્ ।
કામાખ્યં શિવનામતત્વમુભયં વ્યાપ્યાત્મનાં(ના) સર્વતો
    દીવ્ય(પ્ય)ન્તીમિહ તસ્ય સિદ્ધિરચિરાત્સ્યાચ્ચસ્વરૂપૈક્યતા ॥ ૩૪/૩૨ ॥

કાવ્યૈર્વા પઠિતૈઃ કિમલ્પ(પ્ય)વિદુષો ઘો(જો)ઘુષ્યમાણૈઃ પુનઃ
    કિં તૈર્વ્યાકરણૈર્વિબોધિતતયા કિં વાભિધાનશ્રિયા ।
એતૈરમ્બનબોભવીતિ સુકવિસ્તાવત્તવ શ્રીમતો
(એતૈરેવ ન બોભવીતિ કવિતા વૃત્તૈર્વચઃશ્રીમતો)
    યાવન્નાનુસરીસરીતિ સરણિં પાદાબ્જયોઃ પાવનીમ્ ॥ ૩૫/૩૩ ॥

ગેહં નાકતિ ગર્વિતઃ પ્રણમતિ સ્ત્રીસઙ્ગમો મોક્ષતિ

દ્વેષી મિત્રતિ પાતકં સુકૃતતિ ક્ષ્માવલ્લભો દાસતિ ।
મૃત્યુર્વૈદ્યતિ દૂષણં સુગુણતિ ત્વત્પાદસંસેવના-
ત્ત્વાં વન્દે ભવભીતિભઞ્જનકરીં ગૌરી ગિરીશપ્રિયામ્ ॥ ૩૬/૩૪॥

આદ્યૈરગ્નિરવીન્દુબિમ્બનિલયૈરમ્બ ત્રિલિઙ્ગાત્મભિ-
ર્મિશ્રારક્તસિતપ્રભૈરનુપમૈર્યુષ્મત્પદૈસ્તૈસ્ત્રિભિઃ ।
સ્વાત્મોત્પાદિત (આત્મોદ્ભાસિત) કાલલોકનિગમાવસ્થામરાદિ-
ત્રયૈરુદ્ભૂતં (ત્રયં તદ્ભૂતં) ત્રિપુરેતિ નામ કલયેયસ્તે સ ધન્યો ભવેત્ ॥ ૩૭/૩૫॥

આદ્યો જાપ્યતમાર્થવાચકતયા રૂઢસ્સ્વરઃ પઞ્ચમ-
સ્સર્વોત્કૃષ્ટતમાર્થવાચકતયા વર્ણઃ પવર્ણાત્મકઃ (પવર્ગાન્તકઃ) ।
વક્ત્રત્વેન મહાવિભૂતિસરણિસ્ત્વાધારગોહૃદ્રતો
ભ્રૂમધ્યે સ્થિત ઇત્યતઃ પ્રણવતાં તે ગીયતેઽમ્બાગમૈઃ ॥ ૩૮/૩૬॥

ગાયત્રી સશિરા તુરીયસહિતા સન્ધ્યાત્રયી ત્વા(ત્યા)ગમૈ-
રાખ્યાતા ત્રિપુરે ત્વમેવ મહતાં શર્મપ્રદા કર્મણામ્ ।
તત્તદ્દર્શનમુખ્યશક્તિરપિ ચ ત્વં કર્મબ્રહ્મેશ્વરી
કર્તાહં પુરુષો હરિશ્ચ સવિતા બુદ્ધશ્શિવસ્ત્વં ગુરુઃ ॥ ૩૯/૩૭॥

અન્નપ્રાણમનઃ પ્રબોધપરમાનન્દૈશ્શિરઃપક્ષયુ-
ક્પુચ્છાત્મપ્રકટૈર્મહોપનિષદાં વાક્યૈઃ પ્રસિદ્ધીકૃતૈઃ ।
કોશૈઃ પઞ્ચભિરેભિરમ્બ ભવતીમેતત્પ્રલીનામિતિ
જ્યોતિઃપ્રજ્વલદુજ્જ્વલાત્મચપલાં યો વેદ સ બ્રહ્મવિત્ ॥ ૪૦/૩૮॥

સચ્ચિત્તત્વમસીતિ વાક્યવિદિતૈરધ્યાત્મવિદ્યા શિવે
બ્રહ્માખ્યૈરતુલપ્રભાવજનકૈસ્તત્વૈસ્ત્રિભિસ્સદ્ગુરોઃ ।
ત્વદ્રૂપસ્ય મુખારવિન્દકુહરાત્સમ્પ્રાપ્ય દીક્ષામતો
યસ્ત્વાં વિન્દતિ તત્ત્વતસ્ત(સ્ત્વ)દહ(મહ)મિત્યાર્યે સ મુક્તો ભવેત્ ॥ ૪૧/૩૯॥

સિદ્ધાન્તૈર્બહુભિઃ પ્રમાણગણિતૈર(તૈલ)ન્યૈરવિદ્યાતમો-
નક્ષત્રૈરિવ સર્વમન્ધતમસં તાવન્ન નિર્ભિદ્યતે ।
યાવત્તે સવિતૈવ સમ્મતમિદં નોદેતિ વિશ્વાન્તરે
જન્તોર્જન્મનિવારણૈકભિદુરં શ્રીશામ્ભવિ શ્રીશિવે ॥ ૪૨/૪૦॥

આત્માસૌ સકલેન્દ્રિયાશ્રયમતો(નો) બુદ્ધ્યાદિભિશ્શોચિતઃ
કર્માબદ્ધતનુર્જનિઞ્ચ મરણં(રમણં) પ્રાપ્નોતિ યત્કારણાત્ ।
યત્તે (તત્તે) દેવિ મહાવિલાસલહરીવિદ્યાયુધા(સુધા)નાં જય-

સ્તસ્માત્ત્વાં ગુરુમભ્યુપેત્ય કલયે ત્વામેવ ચેન્મુચ્યતે ॥ ૪૩/૪૧॥

નાનાયોનિસહસ્રસમ્ભવવશાજ્જાતા જનન્યઃ કતિ
પ્રખ્યાતા જનકાઃ કિયન્ત ઇતિ મે સત્સ્યન્તિ(સેત્સ્યન્તિ) ચાગ્રે કતિ ।
એતેષાં ગણનૈવ નાસ્તિ મહતસ્સંસારવારાન્નિધે-
ર્ભીતં માં નિતરામનન્યશરણં રક્ષાનુકમ્પાનિધે ॥ ૪૪/૪૨॥

દેહક્ષોભકરૈર્વ્રતૈર્બહુવિધૈર્ધ્યાનૈશ્ચ હોમૈર્જપૈઃ
સન્તાનૈર્હયમેધમુખ્યસુમખૈર્નાનાવિધૈઃ કર્મભિઃ ।
યત્સઙ્કલ્પવિકલ્પજાલમલિનં(મિલિતં) પ્રાપ્તં પદં તસ્ય તે
દૂરાદેવ નિવર્તતે પરતરં માતઃ પદં નિર્મલમ્ ॥ ૪૫/૪૩॥

પઞ્ચાશન્નિજદેહજાક્ષરભવૈર્નાનાવિધૈર્ધાતુભિઃ
બહ્વર્થૈઃ પદવાક્યમાનજનકૈરર્થાવિનાભાવિતૈઃ ।
સાભિપ્રાયવદર્થકર્મફલદૈઃ ખ્યાતૈરનન્તૈરિદં
વિશ્વં વ્યાપ્ય ચિદાત્મના(ઽ)હમહમિત્યુજ્જૃમ્ભસે માતૃકે ॥ ૪૬/૪૪॥

શ્રીચક્રં શ્રુતિમૂલકોશ ઇતિ તે સંસારચક્રાત્મકં
વિખ્યાતં તદધિષ્ઠિતાક્ષર શિવજ્યોતિર્મયં સર્વતઃ ।
એતન્મન્ત્રમયાત્મિકાભિરરુણશ્રીસુન્દરીભિર્વૃતે(તં)
મધ્યે બૈન્દવસિંહપીઠલલિતે ત્વં બ્રહ્મવિદ્યે શિવે ॥ ૪૭/૪૫॥

આતામ્રાર્કસહસ્રદીપ્તિસુષુમાસૌન્દર્યસારૈરલં
લોકા(કાલા)તીતમહોદયૈરુપચિતૈસ્સર્વોપમાગોચરૈઃ ।
નાનારત્નવિભૂષણૈરમ(ગ)ણિતૈર્જાજ્વલ્યમાનાભિત-
સ્ત્વં (ત્વં) માતસ્ત્રિપુરારિસુન્દરિ કુરુ સ્વાન્તે નિવાસં મમ ॥ ૪૮/૪૬॥

બિન્દુપ્રાણવિસર્ગજીવસહિતં બિન્દુત્રિજીવાત્મકં
ષટ્કૂટા વિનિપર્યયા નિગદિતા તાવત્ત્રિબાલાર્બલા ।
એભિસ્સમ્પુટિતં પ્રજપ્ય વિહરેત્પ્રાસાદમન્ત્રં પરં
ગુહ્યાદ્ગુહ્યતમં સયોગજનિતં સદ્ભોગમોક્ષપ્રદમ્ ॥ ૪૯/- ॥

શિઞ્જન્નૂપુરપાદકઙ્કણમહામુદ્રાસુલાક્ષારસા-
લઙ્કારાઙ્કિન્તમઙ્ઘ્રિપઙ્કજયુગં શ્રીપાદુકાલઙ્કૃન્તમ્ ।
ઉદ્ભાસ્વન્નખચન્દ્રખણ્ડરુચિરં રાજજ્જપાસન્નિભં
બ્રહ્માદિત્રિદશા(શૈઃ) મુરાર્ચિતમિદં (સમાર્ચિતપદં) મૂર્ધ્નિ સ્મરામ્યમ્બિકે ॥ ૫૦/૪૬॥

આરક્ત(ચ્)છવિનાતિમાર્દવયુજા નિઃ(નિ)શ્વાસહાર્યેણ ચ
 ત્કૌશેયેન(યૈર્ન) વિ(વ)ચિત્રરત્નઘટિતૈર્મુક્તાફલૈરુજ્વલૈઃ ।
કૂજત્કાઞ્ચનકિઙ્કિણીભિરભિતસ્સન્નદ્ધકાઞ્ચીગુણે-
 રાદીપ્તં સુનિતમ્બબિમ્બમરુણં તે ભાવયામ્યમ્બિકે ॥ ૫૧/૪૭॥

કસ્તૂરીઘનસારકુઙ્કુમરજોગન્ધોત્કટૈશ્ચન્દનૈ-
 રાદી(લિ)પ્તં મણિમાલયા વિરચિત(સુરુચિર)ગ્રૈવેયહારાદિભિઃ ।
દીપ્તં દિવ્ય (દીપ્યદ્દિવ્ય) વિભૂષણૈર્જનનિ તે જ્યોતિર્વિભાસ્વત્કુચ-
 વ્યાજસ્વર્ણઘટદ્વયં હરિહરબ્રહ્માદિપીતં ભજે ॥ ૫૨/૪૮॥

મુક્તારત્નસુવર્ણકાન્તિલલિતાસ્તે બાહુવલ્લીરહં
 કેયૂરોત્તમબાહુદણ્ડવલયૈર્હસ્તાઙ્ગુલીભૂષણૈઃ ।
સંવૃત્તાઃ (સમ્પૃક્તાઃ) કલયામિ હીરમણિમન્મુક્તાકલાપીકૃતં
 ગ્રીવાપટ્ટવિભૂષણેન સુભગં કણ્ઠઞ્ચ કમ્બુશ્રિયમ્ ॥ ૫૩/૪૯॥

ઉદ્યત્પૂર્ણકલાનિધીશ(શ્રિ)વદનં ભક્તપ્રસન્નં સદા
 સમ્ફુલ્લામ્બુજપત્રકાન્તિસુષુમાધિક્કારદક્ષેક્ષણમ્ ।
સાનન્દં કૃતમન્દહાસમસકૃત્પ્રાદુર્ભવત્કૌતુકં
 કુન્દાકારસુદન્તપઙ્ક્તિરુચિરં પૂર્ણં સ્મરામ્યમ્બિકે ॥ ૫૪/૫૦॥

તપ્તસ્વર્ણકૃતોરુકુણ્ડલયુગં માણિક્યમુક્તોલ્લસ-
 દ્ધીરાબદ્ધમનન્યતુલ્યમપરં હૈમઞ્ચ ચક્રદ્વયમ્ ।
શુક્રાકારનિકારદક્ષમમલં મુક્તાફલં સુન્દરં
 બિભ્રત્કર્ણયુગં ભજામિ લલિતં નાસાગ્રભાગં શિવે ॥ ૫૫/૫૧॥

જાતીચમ્પકકુન્દકેસર મહાગન્ધોત્કિરત્કેતકી- (મહાગન્ધોત્કરં કેતકી)-
 નીપાશોકશિરીષમુખ્યકુસુમપ્રોત્તંસિતા ધૂપિતા(તાઃ) ।
આનીલાઞ્જનની(લી)લમત્તમધુપશ્રેણી ચ વેણી તવ
 શ્રીમાતશ્શ્રયતાં મદીયહૃદયામ્ભોજે સરોજાલયે ॥ ૫૬/૫૨॥

લેખાલભ્યવિચિત્રરત્નઘટિતં હૈમં કિરીટોત્તમં
 મુક્તાકાઞ્ચનકિઙ્કિણીગણમહાહીરપ્રબન્ધોજ્વલમ્ ।
ચઞ્ચચ્ચન્દ્રકલાકલાપલલિતં દેવદ્રુપુષ્પાર્ચિતં
 માલ્યૈરેવવિલમ્બિતં સુશિખરં વિભ્રચ્છિરસ્તે ભજે ॥ ૫૭/૫૩॥

પ્રોક્ષિપ્તોચ્ચસુવર્ણદણ્ડલલિતં પૂર્ણેન્દુબિમ્બાકૃતિં
 ચક્રં (છત્રં) મૌક્તિકરત્નચક્રકલિતં ક્ષૌમાંશુકોત્તંસિતમ્ ।

મુક્તાજાલવિલમ્બિતં સકલશં નાનાપ્રસૂનાર્ચિતં
ચન્દ્રોડ્ડામરચામરાલિ દધતી(તીઃ) શ્રીદેવિ તે સ્વસ્ત્રિયઃ ॥ ૫૮/૫૪॥

વિદ્યામન્ત્રરહસ્યવિન્મુનિગણૈઃ કૂર્મોપચારાર્ચનાં
દેવાદિસ્તુતિગીયમાનચરિતાં વેદાન્તતત્વાત્મિકામ્ ।
સર્વાસ્તાશ્ચ તુરીયતામુપગતાસ્ત્વદ્રશ્મિદેવ્યઃ પરા
સ્તન્નિત્યં (સ્ત્વાં નિત્યં) સમુપાસતે સ્વવિભવૈશ્શ્રીચક્રનાથે શિવે ॥ ૫૯/૫૫॥

શ઼ૃઙ્ગારાદિરસાલયં ત્રિભુવનં(ની) માલ્યૈરનેકૈર્વૃતં
સર્વાઙ્ગીણસદઙ્ગરાગસુરભિ શ્રીમદ્વપુર્ધૂપિતમ્ ।
તામ્બૂલારુણપલ્લવાધરયુતં રમ્યં ત્રિપુષ્ટું વહ-
ત્ફાલં નન્દનચન્દનેન સુરભિ ધ્યાયામિ તે મઙ્ગલમ્ ॥ ૬૦/૫૬॥

એવં યસ્સ્મરતિ પ્રબુદ્ધસુમતિશ્શ્રીમત્સ્વરૂપં પરં
વૃદ્ધો(ऽ)પ્યાશુ યુવાભવત્યનુપમસ્ત્રીણામનઙ્ગાયતે ।
સ્પષ્ટૈ(સોઽષ્ટૈ)શ્વર્યતિરસ્કૃતાખિલસુરશ્રીજૃમ્ભિતાત્માલયઃ
પૃથ્વીપાલકિરીટકોટિવલિભિર્નીરાજિતાઙ્ઘ્રિર્ભવેત્ ॥ ૬૧/૫૭॥

અથ તવ ધનુઃ પુણ્ડ્રેક્ષુકૃત્પ્રસિદ્ધમણિદ્યુતિ
(અથ તવ ધનુઃ પુષ્પેષુત્વ પ્રસિદ્ધમણિદ્યુતિ)
ત્રિભુવનબધૂમોહજ્યોત્સ્નાકલાનિધિમણ્ડલમ્ ।
અખિલજનનિ સ્મારંસ્મારં ગતસ્મરતાઞ્જન-
સ્ત્રિભુવનવધૂમોહામ્બોધેઃ પ્રપૂર્ણવિધુર્ભવેત્ ॥ ૬૨/૫૮॥

(સ્ત્રિભુવનવધૂમોહે બભ્રે પ્રપૂર્ણવિધુર્ભવેત્) ॥ ૬૨/૫૮॥

પ્રસૂનશરપઞ્ચક(ચમ્પક)પ્રકટગુમ્ફનાગુમ્ફિતં
ત્રિલોકમવલોકયત્યમલચેતસાં ચઞ્ચલમ્ ।
અશેષરમણીજનસ્મરવિજૃમ્ભણં યસ્સદા
પટુર્ભવતિ તે શિવે ત્રિજગદઙ્ગનાક્ષોભણે ॥ ૬૩/૫૯॥

પાશં પ્રપૂરિતમહાસુમતિપ્રકાશં
યો વા તવ ત્રિપુરસુન્દરિ સુન્દરીણામ્ ।
આકર્ષણેઽખિલવશીકરણે પ્રવીણ-
શ્ચિત્તેવસન્ સ ભુવનત્વયવશ્યકૃત્સ્યાત્ ॥ ૬૪/૬૦॥

યસ્સ્વાન્તે કલયતિ કોવિદસ્ત્રિલોકી-

સ્તમ્ભારમ્ભણવેક્ષણકૃત્યુ(મત્યુ)દારવીર્યમ્ ।
માતસ્તે વિજયતાં કુશં સયોષા (સ યોષાં)
દેવાસ્તં ભજતિ (દેવાં સ્તમ્ભયતિ) ચ ભૂભુજોઽત્ર સૈન્યમ્ ॥ ૬૫/૬૧ ॥

પાશધ્યાનવશાદ્ભવેદ્ભવમહામોહામ્ભસોજ્જૃમ્ભણં
પ્રખ્યાતપ્રવ્યવેષુ ચિન્તનવશાત્તત્તચ્છરવ્યં સુધીઃ ।
ચાપધ્યાનવશાત્સમસ્તજગતાં મૃત્યોર્વશત્વં મહા-
દુર્ગસ્તમ્ભમહાઙ્કુશસ્ય મનનાન્માયામમેયાં તરેત્ ॥ ૬૬/- ॥

(પાશધ્યાનવશાત્સમસ્તવશતા મૃત્યોર્વશત્વં મહા-
દુર્ગસ્તમ્ભમહાઙ્કુશસ્ય મનસા માયામમેયાં તરેત્ ।
પાશાધ્યાનવશાદ્ભવેદ્ભવમહામોહામ્ભસો જૃમ્ભણં
પ્રખ્યાતપ્રસવેષુચિન્તનવશાત્તત્તચ્છરવ્યં સુધીઃ) ॥ -/૬૨ ॥

ન્યાસં કૃત્વા ગણેશં ગ્રહગણમહાયોગિનીરાશિપીઠૈઃ
પઞ્ચાશન્માતૃકાર્ણ(ર્ણૈઃ) સહિતબહુકલૈરષ્ટવાગ્દેવતાભિઃ ।
સશ્રી(સ સ્ત્રી) કણ્ઠાદિયુગ્મૈર્નિજવિમલતનૌ કેશવાદ્યૈશ્ચ તત્વૈ-
ષટ્ત્રિંશક્ત(દ્ભિર્ધરાદ્યૈ)માદ્યૈર્ભગવતિ ભવતીં યસ્સ્મરેત્સ ત્વમેવ ॥ ૬૭/૬૩ ॥

ભગવતિ તવ પાદપદ્માતિસદ્માવિક શ્રી
સ્ત્રિજગતિ પરિહૃત્ય ભદ્રાય નિદ્રાદિષુ ।
અલિ ઇતિ કલનાદસઙ્ગીતભઙ્ગીકૃતે
પરિમલમિહ કિન્તુ વન્દેતિ સન્દેહિતઃ ॥ ૬૮/- ॥

સુરપતિપુરલક્ષ્મીજૃમ્ભણાતીતલક્ષ્મીઃ
પ્રભવતિ નિજગેહે યસ્ય દેવત્વમાર્યે ।
વિધૃતબહુકલાનાં પાત્રભૂતસ્ય તસ્ય
ત્રિભુવનવિદિતા સા જૃમ્ભિતા કીર્તિરચ્છા ॥ ૬૯/૬૪ ॥

માતસ્ત્વં ભૂર્ભુવસ્વર્મહિતતમતનુસ્ત્વન્તરિક્ષં ન સૂર્યો
(માતસ્ત્વં ભૂર્ભુવઃસ્વર્મહિતતમતનું ત્વન્તરિક્ષેન્દુસૂર્યૈ-)
રાજ્ઞી(જ્ઞા) શુક્રેન્દ્રવહ્નીન્દુભિરપિ નિગમબ્રહ્મભિઃ પ્રોતશક્તિઃ (ક્તિં) ।
પ્રાણાપાનાદિયુક્તૈઃ (ગ્મૈ) કલયતિ સકલં માનસં(સે) ધ્યાનયોગા-
દ્યેષાં તેષાં સપર્યા ભવતિ સુરકૃતા બ્રહ્મતા (બ્રહ્મ તે) યોગ્યતા (જાનતે) ચ ॥ ૭૦/૬૫ ॥

ક્વ મે બુદ્ધિર્વાચઃ પરમવિદુષો મન્દસરણિઃ
ક્વ તે માતર્બ્રહ્મપ્રમુખવિબુધસ્વાન્તવચસામ્ ।

(ક્વ તે માતર્બ્રહ્મપ્રમુખવિબુધાઃ સ્વાન્તવચસઃ ।)
અભૂમા વિષ્ફૂર્તિઃ પરતરમહિમ્નસ્તવ નુતૌ
પ્રસીદ ક્ષન્તવ્યં બહુલતરચાપલ્યમપિ મે ॥ ૭૧/૬૬॥

પ્રસીદ પરદેવતે મમ હૃદિ પ્રભૂતં ભયં
નિવારય દરિદ્રતાં દલય દેહિ સર્વજ્ઞતામ્ ।
વિધેહિ કરુણાનિધે શિરસિ પાદયુગ્મં સ્વકં
વિદારય જરામૃતિં(તી) ત્રિપુરસુન્દરિ શ્રીશિવે ॥ ૭૨/૬૭॥

(ફલમ્) -
ઇતિ ત્રિપુરસુન્દરીસ્તુતિમિમાં પઠેદ્યસ્સુધીઃ
સ સર્વદુરિતાટવીપટલચણ્ડદાવાનલઃ ।
લભેન્મનસિ વાઞ્છિતં પ્રચુરસિદ્ધિરિદ્ધિર્ભવે-
દનેકવિધસમ્પદાં પદમનન્યતુલ્યો ભવેત્ ॥ ૭૩/૬૮॥

સઙ્ગીતં સરસં કવિત્વસરણિં આમ્નાયવાક્યસ્મૃતી- (ચાપ્રાણવાચા શ્રુતિ-)
વ્યાખ્યાનં હૃદિ તાવકીનચરણદ્વન્દ્વઞ્ચ સર્વજ્ઞતાં (સર્વજ્ઞામ્) ।
શ્રદ્ધાં (શ્રેષ્ઠે) કર્મણિ કાલિકે તવ બલં શ્રીજૃમ્ભણં મન્દિરે
સૌન્દર્યં વપુષિ પ્રકાશમતુલં અમ્બેશ્વરિ (પ્રાપ્નોતિ) શ્રીશિવે ॥ ૭૪/૬૯॥

પૃથ્વીપાલપ્રકટમકુટસ્રગ્રજોરઞ્ચિતાઙ્ઘ્રિઃ
વિદ્વત્પૂજાનતિમતિસમારાધિતો બાધિતારિઃ ।
વિદ્યાસ્સર્વાઃ કલયતિ હૃદા ભાસયન્તિ પ્રભાભિઃ
લોકાસ્સર્વે નવનવપદૈરિન્દુબિમ્બપ્રકાશૈઃ ॥ ૭૫/૭૦॥

ભૂષ્યં વૈદુષ્યમુદ્યદ્દિનકરકિરણાકારમાકાર(કૌમાર) તેજાઃ
સુજ્ઞાનં ભૂરિમાનં દિનકરલલિતં દુર્ગમં યોગમાર્ગમ્ ।
આયુષ્પઞ્ચાષ્ટસિદ્ધિં હરગિરિવિશદાં કીર્તિમભ્યેત્યભૂમૌ
દેહાન્તે બ્રહ્મપારં પરમશિવચિદાકારમભ્યેતિ વિદ્વાન્ ॥ ૭૬/૭૧॥

ઉચ્ચેષુ નીચેષ્વપિ દર્શનેષુ પ્રકાશતે દેવિ તબ સ્વરૂપમ્ ।
સમુજ્વલન્ત્યેવ હિ યજ્ઞવાટે ચણ્ડાલવેશ્મન્યપિ જાતવેદાઃ ॥ ૭૭/૭૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ભવાખ્યે દુર્વાસસાવિરચિતં
ત્રિપુરામ્બિકામહિમ્નસ્તોત્રં સમ્પૂર્ણમ્ ॥

શ્રીશક્તિમહિમ્નસ્તોત્રમ્ ॥

દેવીમહિમ્નસ્તુતિઃ
ત્રિપુરામ્બિકામહિમ્નસ્તવઃ

- ॥ શ્રીશિવરહસ્યમ્ । ભવાખ્યઃ દ્વિતીયાંશઃ । અધ્યાયઃ ૨૯ ॥

- .. shrIshivarahasyam . bhavAkhyaH dvitIyAMshaH . adhyAyaH 29..

Notes:
Shloka-numbering and number of shloka-s have
been found to differ amongst the two referenced
source texts, and have been integrated on this page.

Proofread by DPD, Ruma Dewan

---

*Shri Shaktimahimna or Shri Tripuramba Mahimna Stotram*
pdf was typeset on September 15, 2023

Please send corrections to *sanskrit@cheerful.com*